# Chinmayalinga Ashtakam

# चिन्मयलिङ्गाष्टकम्

## Document Information

Text title : Chinmayalinga Ashtakam

File name : chinmayalingAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From Atmanatha Stuti Manjari, Ed. S. V. Radhakrishna Sastri

Latest update : December 12, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2022

*sanskritdocuments.org*

Chinmayalinga Ashtakam

# चिन्मयलिङ्गाष्टकम्

(श्रीरुद्रकृतम्)

ब्रह्ममुखामरपूजितलिङ्गं जिह्मगभूषणभूषितलिङ्गम् ।
सिंहमहामदमर्दनलिङ्गं चित्त सदा भज चिन्मयलिङ्गम् ॥ १॥

कनकधराधरकार्मुकलिङ्गं सनकमुखादिसुसन्नुतलिङ्गम् ।
दिनकरकोटिसुदीधितिलिङ्गं चित्त सदा भज चिन्मयलिङ्गम् ॥ २॥

अष्टविभूतिदमिष्टदलिङ्गं सृष्टजगत्त्रयरक्षकलिङ्गम् ।
अष्टमहाभयशिक्षकलिङ्गं चित्त सदा भज चिन्मयलिङ्गम् ॥ ३॥

मत्तगजाजिनवेष्टितलिङ्गं दग्धजगत्कृतपञ्चकलिङ्गम् ।
उत्तमपूरुषवत्सललिङ्गं चित्त सदा भज चिन्मयलिङ्गम् ॥ ४॥

अङ्गभवाङ्गसुभङ्गदलिङ्गं तुङ्गजटाभरशोभितलिङ्गम् ।
मङ्गलदायकमद्भुतलिङ्गं चित्त सदा भज चिन्मयलिङ्गम् ॥ ५॥

पङ्कजनेत्रसमर्चितलिङ्गं शङ्करमादिममच्युतलिङ्गम् ।
सङ्कटदोषनिवर्तकलिङ्गं चित्त सदा भज चिन्मयलिङ्गम् ॥ ६॥

अभ्रसभान्तरनर्तनलिङ्गं शुभ्रविभूतिविभूषितलिङ्गम् ।
शुभ्रहृदम्बुजशोभितलिङ्गं चित्त सदा भज चिन्मयलिङ्गम् ॥ ७॥

कुन्दवनान्तरमन्दिरलिङ्गं मन्दहसाननसुन्दरलिङ्गम् ।
वन्दितभक्तजनावृतलिङ्गं चित्त सदा भज चिन्मयलिङ्गम् ॥ ८॥

रुद्रकृताष्टकमद्भुतमेतद्भद्रकरं पठतीह मनुष्यः ।
इष्टफलं समवाप्य यथेष्टं शिष्टजनोत्तम एव हि स स्यात् ॥ ९॥

इति श्रीरुद्रकृतं चिन्मयलिङ्गाष्टकं सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Chinmayalinga Ashtakam*

pdf was typeset on December 22, 2022

Please send corrections to *sanskrit@cheerful.com*